# पाठ-१९
# क्रोधोऽनर्थकारकः

**सारान्शः**
पुरा भगवान् ब्रह्मा देवैः परिवृतः विद्यागोष्ठीः भावयन् उपाविशत। गोष्ठ्यां वेदमन्त्राणां पाठः अभवत्। विद्यायाः विभिन्नेषु विषयेषु वादविवादः प्राचलत्। एकस्मिन् विषये क्रोधयुक्तः दुर्वासाः ऋषिः केन अपि मुनिना सह कलहायमानः साम गायने स्वरभङ्गम् अकरोत्। तत् श्रुत्वा भगवती सरस्वती अहसत् । अपमानम् अनुभूय दुर्वासाः सरस्वतीं शप्तुं जलं हस्ते अगृहणात् ।अस्मिन् अवसरे देवी सावित्री अपि ब्रह्मणः समीपे समुपविष्टा आसीत्। सा दुर्वाससम् अवदत् यत् सः क्रोधी, आत्मापराधम् अगण्य्य सर्वैः वन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् इच्छति । देवैः शिष्यैः च प्रसाद्यमानोऽपि पित्रा अत्रिणा च निवार्यमाणः अपि सः सरस्वत्याः विद्याजनितगर्वं दूरीकर्तुं "गच्छ अधः मर्त्यलोकम्" इति कथयित्वा शापजलं विसर्जितवान् । प्रतिशापं दातुम् उद्यताम् सावित्रीं सरस्वती न्यवारयत्।पितामहः सरस्वतीं शप्तां दृष्ट्वा शापकलकलं दूरीकृत्य गंभीरस्वरेण अकथयत् दुर्वासमुनेः मार्गः उचितः नास्ति। यः जितेन्द्रियः न भवति तस्य विवेकः नश्यति। मुनिना तु क्षमा कर्त्तव्या यतोहि क्षमा हि मूल सर्वतपसाम् ऋषेः दुर्वाससः दृष्टिः तु परदोषदर्शनदक्षा अस्ति । क्रोधेन अभिभूता बुद्धिः आत्मनः दोषं न पश्यति अतिरोषेण जनः अन्धः भवति। क्रोधे विद्यमाने सति किमर्थं सः निरपराधसरस्वतीं शापेन निगृहीतवान्। तदनन्तरं ब्रह्मा सरस्वतीम् अकथयत् यत् सा विषादं न कुर्यात् । सावित्री तया सह मर्त्यलोकं गमिष्यति। पुत्रस्य मुखदर्शनपर्यन्तम् शापस्य अवधिः भविष्यति।

**मुख्य बिन्दवः**
**देव्यः-** भारतीय संस्कृतौ तिस्त्रः प्रमुखाः देव्याः स्मर्यन्ते ।
**सरस्वती-** इयं विद्यायाः देवी अस्ति । इयं श्वेतवस्त्रावृता तिष्ठति अस्याः वाहनं हंसः अस्ति यः श्वेतवर्णः भवति। अस्याः हस्ते स्फटिकमाला भवति । अन्यस्मिन् हस्ते पुस्तकं तिष्ठति ।
**दुर्गा-** इयं शक्तेः देवी । इयं पार्वती इत्यपि उच्यते । चामुण्डा, कात्यायनी, कालिका इत्यादीनि दुर्गायाः अन्यानि नामानि सन्ति ।
**लक्ष्मीः-** इयं धनस्य देवी । इयं रमा, श्रीः इत्यपि कथ्यते । इयं देवैः असुरैः च समुद्रे मन्थनकाले चतुर्दशरत्नैः सह लब्धा इयं विष्णोः नारायणस्य पत्नी अस्ति। अस्याः वाहनम् उलूकः अस्ति।
**सावित्री-** सावित्री ब्रह्ममणः पत्नी सावित्री गायत्री मन्त्रस्य, अधिष्ठात्री देवी अस्ति ।
**वेदाः-** वेदाः ज्ञानमयाः ग्रन्थाः सन्ति वेदाः चत्वारः सन्ति ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदः। ऋग्वेदे देवस्तुतयः वर्तन्ते। यजुर्वेदे यज्ञानां सम्बन्धे मन्त्राः सन्ति। सामवेदे गानानि सन्ति । अथर्ववेद स्वास्थ्यस्य, समाजस्य लोकव्यवहारस्य मन्त्राः सन्ति।

**अवगच्छामः**
मानव जीवने सर्वदा सर्वम् अनुकूलमेव न घटते । कदाचित् कामनाः प्रतिहताः भवन्ति, कदाचित् कश्चित् कस्यचित् उपहासं करोति ।एतादृशीषु प्रतिकूलपरिस्थितिषु केचन जनाः सर्वं शान्तभावेन सहन्ते । परम् अपरे केचित् क्रुद्धाः भूत्वा आत्मनः परेषां च अपकारं कुर्वन्ति । क्रोधस्य परिणामाः भयङ्कराः एव भवन्ति । **गीतायाम् उक्तं च भगवता कृष्णेन-**
क्रोधात् भवति सम्मोहः संमोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ।।

**आवश्यकोऽयं ज्ञानम्**
**1.**त्रिविधं नरकसयेदँ द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्रयं त्यजेत्।।
**2.**क्रोधो मूलमनर्थानां क्रोधः संसारबन्धनम्।
धर्मक्षयकरः क्रोधः तस्मात् क्रोधं विवर्जयेत्॥
**3.**क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥
**4.**अक्रोधनो क्रोधनेभ्यो विशिष्टस्तथा,
तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषेभ्यो मानुषाश्च प्रधाना,
विद्वांस्तथैवाविदुषः प्रधानः ॥
**5.**आक्रुष्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**समासाः षड्-विधाः ।**
तत्पुरुषः कर्मधारयः बहुव्रीहिर्द्विगुर्द्वंद्वः
अव्ययीभावश्चेति भेदात् ।
पूर्वपदार्थप्रधानोऽव्ययीभावः ।
उत्तरपदार्थप्रधानस्तत्पुरुषः ।
उभयपदार्थप्रधानो द्वन्द्वः ।
अन्यपदार्थप्रधानो बहुव्रीहिः ।
द्विगुकर्मधारयौ तत्पुरुषभेदौ ।

**शब्दार्थाः**

1. विस्वरम् = बेसुरा
2. परिवृतः = घिरे हुए
3. दुर्विदग्धे = दुरभिमानिनी
4. रोचिषा = तेज से
5. समुपस्पृश्य = आचमन करके
6. स्खलितम् = अपराध को
7. न्यवारयत = रोका
8. अनुयास्यसि = पीछे पीछे जाएगी।

**योग्यतां वर्धयत**

दुर्वाससा शप्ता सरस्वती सावित्र्या सह पृथ्वीतलम् आगच्छत् । सा शोणनद्याः तीरे अवसत् । ऋषेः च्यवनस्य सुतेन दधीचिना सह उषित्वा पुत्रवती अभवत् । पुत्राय वेदानां, शास्त्राणां, कलानां, सर्वासां विद्यानां च ज्ञानं दत्त्वा च्यवनस्य ऋषेः दीधीचेः च आज्ञया सरस्वती सावित्र्या सह ब्रह्मलोकं गतवती । सारस्वतः स्वपितृव्यपुत्रेण वत्सेन सह वृद्धिं गतः । यौवनं प्राप्य सारस्वतः स्वमित्राय वत्साय सर्वाः विद्याः उक्त्वा स्वपितुः दधीचेः तपोवने तपः आचरितुम् अगच्छत्।

वत्सेन वंशः प्राचलत्। तस्य गोत्रस्य नाम वात्स्यायन गोत्रम् इत्यभवत्। वात्स्यायनगोत्रे संस्कृतभाषायाः सुप्रसिद्धः गद्यलेखकः बाणभट्टः जन्म अलभत । तस्य पितुः चित्रभानुः तथा मातुः नाम राजदेवी इति आसीत् ।

**पाठ संप्रेष्यः**

- प्रजापतेः सभायां देवाः विद्याविषये चर्चां कुर्वन्ति स्म ।
- वेदानां पठने स्वराणां शुद्धः प्रयोगः कर्तव्यः ।
- दुर्वाससः मुनेः स्वभावः क्रोधयुक्तः अस्ति ।
- दुर्वाससः शापात् सरस्वती धरणीतले आगता।
- परस्मैपदिधातुभिः सह शतृप्रत्ययस्य प्रयोगः भवति । आत्मनेपदिधातुभिः सह शानच्प्रत्ययस्य प्रयोगः भवति ।
- विसर्गस्थाने रत्वं, सत्वं, शत्वं, उत्वं च भवति ।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत् ।**

- ➢ पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- ➢ पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- ➢ अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।